श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र अनुगृहीतं

# ॥ प्रपन्नमकरन्दस्तोत्रम् ॥

*This document** *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रपन्नमकरन्दस्तोत्रम् ॥

कलयतु कुशलानि कालमेघद्युतिमदधूननधीरदिव्यकान्ति।
किमपि रघुकुलाम्बुराशिरत्नं सकलशुभावहनाम तच्चिरत्नम्॥ १ ॥

घनतरकरुणामृताम्बुराशिप्रसरदुदारतरङ्गकैरपाङ्गैः।
प्रशमितविनतालिचित्ततापं किमपि महो हृदि मेऽस्तु दिव्यरूपम्॥ २ ॥

विविधमणिमरीचिजाललीलाशबलितहेमकिरीटलोलमालम्।
मृगमदतिलकस्फुरन्निटालं हृदय सदा भज कोसलेन्द्रबालम्॥ ३ ॥

विमलकिरणबाललीलफालप्रतिलुलितालकजाललालनीयम्।
नवनलिनदलामलायताक्षं कमपि वशे कलयानि दीनरक्षम्॥ ४ ॥

सुललितचलितातिविभ्रमभ्रूकलनविलोलितभुसुरान्तरङ्गे।
मुकुरतललसत्कपोलभावे लगतु चिरं मम चित्तमादिदेवे॥ ५ ॥

मणिगणरुचिराङ्गकुण्डलश्रीकवचितकर्णयुगे मनोज्ञनासे।
विहरतु मम चित्तवृत्तिरेषा धरणिसुतावशगे चिराय धाम्नि॥ ६ ॥

रसभरपरिपाकराजमानस्फुटतरदाडिमबीजदन्तपङ्क्तिम्।
अधरमणिसुधाविधूतसीताहृदयजतापमुपास्महे पुमांसम्॥ ७ ॥

शरदुदितसुधाकरांशुशैलीमदहरशीतलवाचि सुप्रसन्ने।
अरुणकिरणभिन्नपद्मलक्ष्मीविजयिनि राममुखेऽस्तु मानसं मे॥ ८ ॥

दरदळदरविन्दमन्दमन्दप्रसरदमन्दमरन्दसुन्दराङ्गाः।
विवशितधरणीसुतान्तरङ्गा रघुनृपतेः प्रसरन्तु मय्यपाङ्गाः॥ ९ ॥

अमृतरुचिसहोदरस्मितश्रीजुषि घनकम्बुविडम्बिकन्धरेऽस्मिन्।
सितकरकिरणात्युदारहारे मम हृदयं भवताद्विहारि वीरे॥ १० ॥

करकमलगळन्मरन्दधाराविशयवदावददिव्यचापदण्डम्।
अशिशिरकरवंशजाग्रगण्यं विशतु मनो मम धन्विनां वरेण्यम्॥ ११ ॥

निशिचरकुलकल्पितोग्रदण्डं मनसि महो मम भासतामखण्डम्।
अरिसरसिजधूननातिशौण्डद्विरदकरायितदीर्घबाहुदण्डम्॥ १२ ॥

मरकतहरिनीलपद्मरागस्फुरितमहाङ्गदकङ्कणादिसेव्यम्।
मम नयनपथेऽस्तु वस्तु दिव्यं शुभहरिचन्दनचर्चनातिभव्यम्॥ १३ ॥

नवतरुणिमजानकीमनोज्ञस्तनयुगकर्कशतारसज्ञवक्षः।
किमपि सकललोकभागधेयं मयि विशताच्छुभदायि नामधेयम्॥ १४ ॥

नवजलधरबृन्दतुन्ददीव्यत्तटिदुपमानसुवर्णचारुचेलम्।
त्रिवळिसुललितोदरं सुशीलं रघुकुलरत्नमुपास्महेऽतिनीलम्॥ १५ ॥

कमलजजनिगेहनाभिपद्मस्फुटरसलोलुपरोमभृङ्गराजि।
हृदि परिकलयामि कोसलेन्द्रक्षितिरमणीमृगनाभिचित्रकं तत्॥ १६ ॥

मृगपतितनुमध्यमुन्नतांसं सुविपुलपीवरदिव्यबाहुमध्यम्।
विधुकररुचिरान्तरीयमीडे कमपि युवानमुदारचारुमूर्तिम्॥ १७ ॥

तरुणिममदनेभयुग्मलीलाप्रसृतकरद्वयसन्निभोरुयुग्मम्।
सुमशरजयकाहळायमानस्फुटतरजङ्घमहं भजामि देवम्॥ १८ ॥

शरणगजनचित्तभक्तिपूरहृदकमलाद्वितयं तदङ्घ्रियुग्मम्।
मृदुलशुभतराङ्गुळीमनोज्ञं रुचिरनखं परिचुम्बतान्मनो मे॥ १९ ॥

रघुकुलमणिदिव्यसौधदीपं सुरुचिररूपविधूतपुष्पचापम्।
घनतरमदताटकास्वरूपज्वलनशिखाजलदं भजेऽभिरूपम्॥ २० ॥

चरणनखपरागजातकन्यावितरणमोदितगौतमातिमान्ये।
विलगतु हृदयं महावदान्ये नवतरुणे मम भूसुताप्तिधन्ये॥ २१ ॥

जनकवचनपालनात्तशिक्षे भरतमनोरथदायिदिव्यवीक्षे।
विपिनभुवि विराधदत्तशिक्षे सततमियं मतिरस्तु दीनरक्षे॥ २२ ॥

जरठतमजटायुमुक्तिदानप्रकटितनैजमहावदान्यभावे।
कपिकुलपतिक्लृप्तमित्रभावे विहरतु मे हृदयं चिराय देवे॥ २३ ॥

सरिदधिपतिमध्यबद्धसेतुच्छलपरिदर्शितवैरिधूमकेतुः।
दशवदनविधूननैकहेतुर्हृदि नटताद्रघुवंशदिव्यकेतुः॥ २४ ॥

रघुकुलधरणीशराज्यसिंहासनलसितं धरणीसुतात्तभावम्।
शुभतमकरुणानिधिं भजामस्सकलगुणाकरमेनमादिदेवम्॥ २५ ॥

वितरतु जगतां शुभानि कृष्णाभिधपरकालयतीश्वरेण क्लृप्ता।
स्तुतिरिह महिशूरराजधानीनृपमणिकृष्णमहेन्द्रदेशिकेन॥ २६ ॥

॥ इति प्रपन्नमकरन्दस्तोत्रं संपूर्णम् ॥